नं: ५००८

नाम: गणेश चतुर्थी ब्रत माहात्म्यम्

क. × × × ×

पत्र  १ —— स. ×

विषय: पुराण माहात्म्यं

𑆓𑆟𑆼𑆯𑆖𑆠𑆶𑆫𑇀𑆡𑆵𑆮𑇀𑆫𑆠𑆩𑆳𑆲𑆳𑆠𑇀𑆩𑇀𑆪𑆩𑇀 𑆨𑆮𑆴𑆰𑇀𑆪𑆾𑆠𑇀𑆠𑆫𑆼

𑇕𑇐𑇐𑇘

5008

ॐ श्रीगणेशाय नमः ॐ शिवशंभुं नमस्कृत्य उमादेवीं सरस्वतीं गणाधिपं नमस्कृत्य सर्वदेवगुरुं १ वैशंपायन उवाच उद्यमं
पांडवः श्रुत्वा कामो युधिष्ठिरः उवाच वाक्यं धर्मात्मा कृत्वा देवविनंदनं २ युधिष्ठिर उवाच किं करोमि महावाहो येन भवति मा
यव भीष्मकर्त्ते महायोगा कथयस्व मे भवान् ३ श्रीभगवानुवाच विनायकः महाईशः गणेशः शिवनंदनः तस्य पूजावि
धिं कृत्वा जयं भवति निश्चयः ४ युधिष्ठिर उवाच शिवशंभुर्महायोगी उमादेवी पतिव्रता कथं त्वया भवेज्जन्मसंतेशः यत्र जगद्गु
न ५ श्रीभगवानुवाच शृणु पार्थ महावाहो यतः संवादयत् तत्र यांति सर्वदा सिलोकानां हितकारकः ६ कैलासशिख
रे स्थाने उमादेवी च शंकरः प्रातःस्नानादिकं कर्म गंगातीरे दिने दिने ७ प्रातःकाले शिवो गच्छेत् गंगायां जाह्नवीतटे तत उमाय
मादेवी मर्दनं क्रियते तदा शरीरान्मलसंभवं तं गृहीत्वा तु विशंकरी नराकारं कृतं तत्र दिव्यमानुषमद्भुतं ८ ततो मा
नुष उत्थाय बद्धांजलिरभाषत किं करोमि कृत्वाज्ञां त्वं देवि देहि मे ९ ततो वाक्यं कृतं देव्या मलमानुष संभ
वेत् तमुवाच उमादेवी उद्वेव वचनमब्रवीत् १० श्रीदेव्युवाच रक्ष त्वं मे वाक्यं यथाज्ञां करोम्यहं गच्छ त्वं द्वारदे
शे स्नानं चैव करोम्यहं ११ तैलाभ्यंगं कृतं देहे तोयमसि पवित्रता रूपेनेव भोजय गच्छति मम मंदिरे १२ देवीवाक्यं कृते
तत्र नमो देव्या कृतं तदा प्रणिपत्य महाभागः कृत्वा द्वारमंदिरे १३ अथ शंभुः समागत्य कालरूपस्वयं हरः भुजंग
यु उमालयं च देवगणान् संवृतः १४ निराकृत्ये नैव जानंति मानुष्यं बालबुद्धिमान् नमस्कृत्य तदा शंभुं मातुः ज्ञानं दीयतां १५ ततो मो
तं तु॰ नम॰ वाक्यं कृतं क्रोधेन भूमिपृष्ठे रुदन् तस्य हित्वा त्रिशूलेन शिवस्य कं शिरं गतः १६ शिवलोकं शिरं गत्वा वाक्यं च पुनः स्थितो
तदा शंभुः गृहं गत्वा देव्या वचनमब्रवीत् १७ श्रीदेव्युवाच तैलाभ्यंगं कृतं देहे मर्दनं क्रियते मया शरीरान्मलं मानुषं
दा त्वया कृतं १८ ईश्वर उवाच तत्व पुत्रं न जानामि कालं च दुरतिक्रमा काले देवा विनश्यंति सर्वकालवशा नराः २० का
लः तेषु जागर्ति काले सर्वं भुंजंत वः काले लोका विनश्यंति यत्र रात्र सपन्नगाः २१ त्वया पुत्रं देवि न जानामि सुतं तव
मम लोकशिरं गतान् त्वं शोचितमर्हसि तो २२ ततो हाहाकृतं देव्या उच्चैर्दुःखेन दुःखिता महाशोकं कृतं तत्र हाहा उच्च
मम आत्मज २३ शिवयक्ष गृहं द्वारं प्रसन्नात्मनं तावो महागजेन्द्रं दाहं दृष्ट्वा देया मामतशिरे २४ तत्शिरं शंभुरुद्वृ

याः तस्कवे पद्दतसंधि युतटः गणपतिर्बभौ शिवशंकर रमात्मजा २५

ग·श· ततो देव्या शिवं गत्वा तत्र मध्ये यथा ततः उत्थाय तं देवी च हस्तामिदमब्रवीत् २६ श्री देव्युवाच मम पुत्र हि तं कृत्वा प्रयं चन
१ स्कंद जरः मम पुत्र महादिव्यं रूपमद्भुतदर्शिनं शिव उवाच —— देवि वरं दत्तान्त पुत्रो भविष्यति सर्वसिद्धिप्रद
तारं यत्र जातु पूजितं नरः २८ द्वादश सु नामानि शृणु देवि मया कृतानि यः पठेत्प्रातरुत्थाय मुच्यते सर्वकि
ल्बिषैः २९ प्रथमं वक्रतुण्डनामानि एकदन्तं द्वितीयकं तृतीयं कृष्णपिंगाक्षं चतुर्थं गजवक्त्रकं ३० लंबोदरं प
चमं षष्ठं विकटमेव च सप्तमं विघ्नराजाय धूम्रवर्णं तथाष्टमं नवमं भालचंद्रं च दशमं तु विनायकं ३१ च
दशमं तु गणाधिपं एकादशं गणपतिं द्वादशं तु गजाननं ३२ एतानि द्वादश नामानि यः पठेत् शृणु
यान्नरः सर्वसिद्धिर्भवेत्तस्य संकटं नाकदाचन युधिष्ठिर उवाच गणेशस्य कथं पूजा विधि बुद्धिजनार्दन
केषु मासेषु तिथौ कस्मिन् व्रतं पूजा करोम्यहं ३४ श्री भगवानुवाच मासि मासि व्रतं कुर्यात् सर्वसंकटनिवारणं ३५ सर्वसि
द्धिर्भवेत्तस्य संकटं न भविष्यति मासानां मार्गशीर्षो मासविशेषस्य फलं लभेत् कृष्णपक्षे तिथिश्रेष्ठा चतुर्थी
सिद्धिदायिनी ३६ ... यथाविधि गंधधूपं ततं च सदीपं च समर्चयेत् ३७ नै
वेद्यं च मोदकं च कासारं विविधं दक्षिणां उपवासं व्रतं कुर्यात् अर्घं चंद्रोदये निशि ३८ अर्घं चंद्रोदये दत्वा फलमक्षतं
च मन्त्रयेत् द्वितीये दिवसे प्राप्ते ब्राह्मणान्भोजनं दत्वा स्वात्मभोजनं कारयेत् एकादशी सहस्राणि कन्या
दानयज्ञादि च गवां कोटिसहस्राणि ब्राह्मणं गणाधिपे हरिद्वारे प्रयागे च नैमिषे चैव यत्फलं
विष्णुस्नानतीर्थयात्राया मोक्षं तत्कृत्वा फलं लभेत् ३९ इति श्री भविष्योत्तरपुराणे संकष्टचतुर्थीव्र
तमाहात्म्यं समाप्तम् ॥ श्रीः ॥